OPEN ACCESS

*Int. Jr. of Contemp. Res. in Multi.* *PEER-REVIEWED JOURNAL* *Volume 5 Issue 3 [May-Jun] Year 2026*

IJCRM International Journal of Contemporary Research In Multidisciplinary



*Review Article*

# आचार्यसूर्यमणिरथविरचिते काश्मीरोदयखण्डकाव्ये काश्मीरस्य सौन्दर्यवर्णनम्।

**सुरजविश्वालः**

राष्ट्रियसंस्कृतविश्वविद्यालयः तिरूपति, आन्ध्रप्रदेशः, भारतम्।

**Corresponding Author:** * सुरजविश्वालः

**DOI:** https://doi.org/10.5281/zenodo.21131165

## Abstract

संस्कृतसाहित्यमत्यन्तं व्यापकम् ।मानवसभ्यतायाः सर्वाणि उपादेयोपादानानि अत्र सन्निवेशितानि । आदौ वेदानां रचना जाता तदनन्तरञ्च तद्व्याख्यानभूता ब्राह्मणग्रन्थाः अरच्यन्त, ब्राह्मणग्रन्थेभ्यः पश्चादारण्यकानि विरचितानि ,तदनन्तरमुपनिषदः ततो पुराणानि, रामायणं महाभारतं च। सेयं परम्परा सातत्येन कियता स्वरूपविपर्येण सह काव्य-नाटक-गद्य-चम्पू-कथा-स्मृति-तन्त्रादि-निर्माणविधया चिरमन्ववर्तत।

प्रत्येकदेशस्य संस्कृतिः सभ्यता च साहित्ये एव प्रत्युद्भासितं भवति । देशसंस्कृतेः उत्थानपतने परिवर्तनपरिवर्धने वा तत्साहित्ये एव दृश्यते। तथैव भारतदेशस्य समस्तसंस्कृतिः संस्कृतसाहित्ये लभ्यते। भारतदेशस्य आत्मा संस्कृतसाहित्ये एव वसति । जातेः गुणशीलनिर्माणविषये संस्कृतसाहित्यस्य प्रथमं स्थानं वर्तते। तपः, त्यागः, उदारता, आशावादः, सर्वसमानत्वमित्यादि विषयान् संस्कृतसाहित्यमेव बोधयति। संस्कृतसहित्यं प्रधानतया द्विधा विभक्तुं शक्यते- वैदिकसाहित्यम्, लौकिकसाहित्यञ्चेति ।

सस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीन ग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतमः इति सवैरेव अङ्गीक्रियते। वैदिकवाङ्मये वेदाः संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषदः इत्यादिभेदैः तानि प्रतिभिद्यते ।

वैदिककालादारभ्य साम्प्रतिकालापर्यन्तं सर्वे भारतीयशास्त्रकारा आत्यन्तिकशान्तिं कामयमानास्तदधिगतये यत्नशीला दृश्यन्ते। तदर्थं नानाशास्त्राणि प्रणीतानि नानोपाया अपि परिकल्पिताः, शान्तिस्वरूपस्य परमात्मनः सकाशादेव जातस्य जीवात्मनोपि शान्तिरूपत्वात् स सर्वदैव तत्स्वरूपेऽवस्थातुमीहते।लौकिकवाङ्मये महाभारतरामायणादयः, कालिदासादीनां महाकवीनां काव्य- खण्डकाव्य-रूपकालङ्कारशास्त्राणि विलसन्ति। एतेषु त्रिषु लौकिकसाहित्यस्यापि नितराम् आदरः विद्यते।

## Manuscript Information

- **ISSN No:** 2583-7397
- **Received:** 11-05-2026
- **Accepted:** 25-06-2026
- **Published:** 30-06-2026
- **IJCRM:**5(3); 2026: 1324-1326
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

## How to Cite this Article

सुरजविश्वालः.आचार्यसूर्यमणिरथविरचित काश्मीरोदयखण्डकाव्ये काश्मीरसौन्दर्यवर्णनम्. Int J Contemp Res Multidiscip. 2026;5(3):1324-1326.

## Access this Article Online

www.multiarticlesjournal.com

**KEYWORDS:** काश्मीरोदयखण्डकाव्यम्, आचार्यसूर्यमणिरथः, काश्मीरसौन्दर्यम्, प्रकृतिवर्णनम्, संस्कृतखण्डकाव्यम्


© 2026 सुरजविश्वालः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**खण्डकाव्यलक्षणम्**

खण्डकाव्यं काव्यस्य एकादेशानुकारि भवति । महाकाव्यस्य यानि लक्षणानि भवन्ति तेषां मध्ये सर्वाण्यपि लक्षणानि खण्डकाव्येऽपि लग्नानि भवन्ति । परन्तु सर्गसंख्याविषये सङ्कोचः भवति । अर्थात् अष्टाधिकः महाकाव्यसर्गाः भवेयुः । खण्डकाव्ये तु द्वौ वा त्रयो वा भवति । एवम् अष्टादशवर्णनानां मध्ये कतिपयान्येव वर्णनानि अत्र भवन्ति । एवं महाकाव्यापेक्षया खण्डकाव्यस्य भेदः सिद्ध्यति । खण्डकाव्ये तु एकः पक्षः उन्नीयते । महाकाव्ये एकस्य एकाधिकानां वा नायकस्य नायकानां वा समग्रमेव जीवनं चित्रितं भवति

खण्डकाव्यानामाविष्कार:महाकविकालिदासेन लौकिकसाहित्ये इदम्प्राथम्येन आविष्कृतम् । तस्मात्प्राक् खण्डकाव्यस्य प्राचीनत्वं केषाञ्चित्परिशीलकानां दृष्टिपथे नायातम् । किन्तु अपरेषां परिशीलनं खण्डकाव्यस्य प्रस्तावः ऋग्वेदादिषु निगुढमिति मतम् । वस्तुतः काव्यं नाम कमनीयार्थबोधकत्ववाक्यमेव । यत्र वर्ण्यमाने एकस्मिन् वाक्ये कमनीयार्थबोधकत्वं गोचरति यत्र खण्डकाव्यस्य प्रस्तावः भवत्येव । यत्र वाक्यप्रवाहे कमनीयार्थं स्फुरति तदवश्यं खण्डकाव्यमिति वक्तुं शक्यते । ऋग्वेदे विद्यमानानि वाक्यानि अत्र निदर्शनभूतानि भवितुमर्हन्ति ।

भक्तिसमयं यथा उपनिषत्सु बौद्धादिग्रन्थेषु च ऐतिहासिकं यथा रामायणे महाभारते च प्रस्तुतं प्रकृतिवर्णनं रूपकान्तर्गतं यथा रुपकान्तरुपस्थापितपद्यानि सङ्कीर्णस्य शृङ्गारप्रधानं मेघदूतादिकमिति च पञ्चधा विभक्ताः ।

**कविपरिचयः-**

कवृवर्णने इत्यस्माद्धातोः कवयति वर्णयति वा इति व्युत्पत्त्या लोकोत्तरवर्णनानिपुणः कविः इत्यर्थोऽवगम्यते । कविः क्रान्तदर्शी इत्युच्यते । ब्रह्मा भौतिकसृष्टेः निर्माता भवति । परन्तु कविः सारस्वतकाव्यतत्त्वं निर्माति । कविः भगवतः सृष्टेः अतीतं, वर्तमानं, भविष्यञ्च स्वीयदिव्यदृष्ट्या द्रष्टुं शक्नोति । अतः कविः ऋषिपदवाच्यो भवतीति नास्ति कश्चन संशयः । विषयेऽस्मिन् उक्तं यत् -

**स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः ।**
**दर्शनाद् वर्णनाच्चाथ रूढा लोके कविश्रुतिः ॥**[1]

भारतभूखण्डमिदमतीव विशालं भवति । अस्यामेव पवित्रभूमौ नैकानि राज्यानि सन्ति । परन्तु उन्नतकलास्थापत्यानामाकरः भवति उत्कलराज्यमेतत् । संस्कृतसाहित्यरसिकशिरोमणिः पण्डितप्रवरः उत्कलप्रदेशस्य गौरवभूतस्य चर्तुधामसु अन्यतमे श्रीक्षेत्रधाम्नि स्थितस्य श्रीसदाशिवपरिसरस्य सूर्यकान्तमणिसदृशः आचार्यः सूर्यमणिरथः अन्यतमः ।सः संस्कृतकविपण्डितेषु आचार्यः रथमहोदय स्वीयसरलग्रन्थरचनाचातुर्येण संस्कृतजगति परिचितोऽस्ति । अयं महाशयः स्वकविताप्रतिभया युवकवित्वेन विद्वद्भिरभिनन्दितः । संस्कृतसाहित्ये ऐतिहासिक खण्डकाव्येषु डॉ. सूर्यमणिरथ प्रणीतस्य काश्मीरोदयं खण्डकाव्यस्य स्वारस्यमास्वादयन्ति सहदयाः । सः तस्य कृतौ काश्मीरोदयं खण्डकाव्यमिति काव्यस्यान्ते काव्यपुष्पिकामाध्यमेन स्वपरिचय निरूपणावसरे प्रतिपादयति । कविः रथमहोदयः सहृदयहृदयाह्लादार्थं सामाजिकानां

कानिचनकाव्यकुसुमानि सामाजिकान् प्रति अर्पयति । तेषु विरचितेषु ग्रन्थेषु केचनग्रन्थरत्नानि प्रधानानि भवन्ति ।यथा काश्मीरोदयखण्डकाव्यं भवति ।

**काश्मीरोदयखण्डकाव्ये प्रकृतिवर्णनम्-**

भूस्वर्गरूपेण ख्यातस्य काश्मीरस्य परिसीमामध्ये श्रीनगरमिति एका समृद्धा पर्यटनस्थली वर्त्तते । तत्रपर्वतपाददेशे एकः विशालः ह्रदः शोभते । तस्य ह्रदस्य नाम डालह्रदः । असौ ह्रदः स्वतनुं विस्तारयन् राजते । काश्मीरभ्रमणार्थमागताः पर्यटकाः तत्र नौकामाध्यमेन भ्रमन्ति । वणिक् जनाः अपि स्वनौकासु विविधपण्यद्रव्याणि स्थापयित्वा विक्रयार्थं तत्र भ्रमन्ति । तद्दर्शनेन ज्ञायते यत् तत्र एका भासमाना विपणी वर्त्तते इति । डालह्रदस्य शोभां दृष्ट्वा दर्शकाः अपि कृतकृत्याः भवन्ति । अस्मिन् अवसरे कैलासपर्वतस्थ मानसरोवरस्य अपेक्षया डालह्रदस्य आधिक्यं प्रदर्शयितुं कविः लिखति-

**कैलासपर्वतधरोपरि राजमानं**
**कस्यापि दुर्गमतया भुवि नोपकारम् ।**
**विस्तारयन्नपघनं घननीरपूर्णो**
**यो मानसं हसति पद्मवनच्छलेन ॥**[2]

मानससरोवर : अतुङ्गस्य कैलासपर्वतस्य शिखरभागे वर्त्तते । अतुङ्गपर्वतवेष्टितत्वात् सः सरः अर्थात् मानसः नाम कैलासपर्वतोपरि स्थितः सरः निविडजलपूर्णः अत्यन्तदुर्गमः भवति । अत एव प्राणीनां मानवानां न किञ्चिदुपकारः तस्मात् सरसः भवति । अत्र तु काश्मीरभुवि श्रीनगरे डालह्रदो वर्त्तते । यस्मिन् डालह्रदे काचित् नवविवाहिता तरुणी स्वनायकेन सह नौकाविहारं करोति । नौकाविहारसमये सा नौका मध्ये उपवेशनं कृत्वा नायकस्य वक्षसि स्वशरीरं संश्लेषयति, अथवा नायकस्य अङ्कोपरि निज मस्तकं शयितं करोति । तस्मिन् काले सा पश्यति यत् काचित् हंसी पद्मवने विचरन्तं हंसं चुम्बति । अर्थात् स्वचञ्च्वा हंसस्य चञ्चुं चुम्बति । एतत् दृष्ट्वा नायिकायाः मनसि स्वेन कृतं नायकस्य चुम्बनं स्मृतं भवति । पूर्वचुम्बनं स्मृत्वा सा रोमाञ्चिता सती मृदु सीत्कारध्वनिं करोति ।

डालह्रदमध्ये असंख्यानि नौकागृहाणि राजन्ते । तानि नौकागृहाणि अतिरमणीयानि दृश्यन्ते । रात्रौ तानि गृहाणि नीलविद्युदालोकेन सुतरां शोभां दधाति । डालह्रदे सहस्रशः दम्पती: आगत्य नौकागृहे उषित्वा यौवनसुखमनुभवन्ति।अनेन प्रकारेण हालह्रदस्य सौन्दर्यं सर्वेषां ह्रदयं आकर्षयति । स्वच्छाम्बुनिर्झरजनादविमण्डिताङ्गः – निर्मलजलपूर्णानां निर्झरिणीनां प्रवाहेण जायमानकलध्वनिभूषिताङ्गः, चेतोहरः- रमणीयः, प्रकृतिसुन्दरः, सोनमार्गः - सोनमार्गः इति प्रसिद्धः दर्शनीयः पर्यटकानां कृते आनन्ददायकः स्थानविशेषः, प्रकृतिसुन्दरः प्राकृतिकदृश्यपरिपूर्णत्वात् सुन्दरः, गोलमार्गः - एतन्नाम्ना प्रसिद्धः पर्यटकानामानन्ददायकः स्थानविशेषश्चास्ति । आकाशचुम्बिसरलैः तरुभिः- अतिदीर्घैः सरलनाम्ना प्रसिद्धैः, देवदारुभिः पाइन्जातीयैः चेति, तरुभिः पादपैः, विराजन् शोभमानः सोनमार्गः गोलमार्गश्च इति बोद्धव्यम् ।

श्रेष्ठः ललितनायकः महाराजः जाहाङ्गीरः अप्सराभ्यः अपि कात्या अधिकां प्रियां नीत्वा प्राकृतिकसौन्दर्यपरिपूर्णेऽत्र काश्मीरदेशे वसन्तकाले वासन्तिकीलीलायाः चरमां लीलां विहितवान् । अर्थात् प्रतिवर्षं वसन्तकाले जाहाङ्गीरः स्वपत्न्या सह काश्मीरमागत्य वासन्तिकीक्रीडायाः चरमां लीलां कृतवान्शृङ्गारक्रीडामनुभूतवानित्यर्थः ।

**जाहाङ्गिरो ललितनायकनाकराजो**
**देवाङ्गनाऽधिकरुचा प्रियया सहात्र ।**
**वासन्तिकीं प्रकृतिसंचित कान्तिपुञ्जे**
**लीलामनन्यहृदयं चरमामकार्षीत् ॥**[3]

काश्मीरदेशपरिसीमसमीपवर्ती आलोचितकाश्मीरदेशस्य परिसीमनिकटवर्ती, तापीसरित्जलसुधाकणकृत्यपूर्तिः – 'तापी' इति ताप्ती इति नद्याः जलमेव सुधाकणः तेन संपादिता नित्यकार्यपूर्तिः यत्र सः । अर्थात् ताप्तीनद्याःजलानि व्यवहृत्य यत्र निवासिनः जनाः प्रतिदिनं कार्याणि साधयन्ति । सुसंस्कृतजनाः - अतीवशुद्धाः जनाः यत्र सः । यत्र जनाः पूर्णतया पवित्राः सन्ति । श्रुतिवित्तपूर्णः - श्रुतिः वेदः एव वित्तम्, तेन पूर्णः वैदिकाचारव्यवहारपरिपूर्णः इति । पूतः - पवित्रः, स्वाध्यायतुन्दिलितः - वेदमार्गसमृद्धः, दुर्गरदेशः आस्ते दुर्गरः इति देशः आस्ते ।

**काश्मीरदेशपरिसीमसमीपवर्ती**
**तापीसरिज्जलसुधाकणकृत्यपूर्तिः ।**
**पूतः सुसंस्कृतजनः श्रुतिवित्तपूर्णः**
**स्वाध्यायतुन्दिलितदुर्गरदेश आस्ते ॥**[4]

अधुना जम्मूप्रदेशस्य स्थितिविषये कविः सूचयति यत् - काश्मीरस्य परिसीमायां शोभमानः तापीसरित् जलैः पवित्रितः दुर्गरः इति एकः देशः अस्ति । अत्रत्यजनाः अतीवसंस्कृतिप्रियाः । ते स्वसंस्कृतिसंरक्षणे वद्धादराः । तापीनदीजलामृतेन ते दैनन्दिनं कार्यं । वेदं प्रति जनानां महानादरोऽपि वर्तते । स्वाध्यायमांसलाः अत्रत्याः जनाः सन्ति । एतादृशान् जनान् निजोपरि धारयन् दुर्गरः (जम्मूः) इति एकः देशः राजते । राजा जाहाङ्गिरः स्वप्रियया सह काश्मीरे वासन्तिकीं शोभामनुभवितुमागतवान् । तदानीं तदर्थं सः मनोहरमुद्यानम् रमणीयं हर्म्यञ्च निर्मितवान् । यत्र कामः सर्वदा उवास । पुष्पोद्यानमध्ये मनोहरं तडागमपि विहितवान् । तत्र तडागे राजहंसाः अपि आनन्देन विचरन्ति स्म । एतत् सर्वं स्वकामवर्धनाय एव राज्ञा संपादितम् । एतदपि तस्य प्रियया सह विहितम् अभूतपूर्व सुरतं सूचयति । कामीनां कामोत्तेजनाय यद् यदपेक्षितं तत् सर्वं राज्ञा संपादितमित्यर्थः । श्रीमतः हरिसिंहस्य पुत्रः श्रीमान् कर्णसिंहः । सः १९३१ ख्रीष्टाब्दे जन्मग्रहणं कृतवान् । १९४९ ख्रीष्टाब्दे यदा श्रीकर्णसिंहः अष्टादशे वयसि उपनीतः तदा तस्य पिता श्रीमान्

१)का.अ.सू.-पृ.३१३
[2] काश्मीरोदयम्-श्लोक-१५७
[3] काश्मीरोदयम्-श्लोक-१३४
[4] काश्मीरोदयम्-श्लोक-१४२


© 2026 सुरजविश्वालः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

हरिसिंहः जम्मूकाश्मीरस्य राजारूपेण तस्याभिषेकं कृतवान् । श्रीमान् कर्णसिंहः शुद्धमनाः भवति । संस्कृतपण्डितेषु तस्यानुरागः अतिमहानस्ति । सोऽपि सुगुणधरो वर्तते । अतः सर्वत्र तस्य सम्माननमस्ति ।

**नेपालराजदुहिताऽखिलसद्गुणाढ्या**
**यत्पाणिपीडनमवाप्य मुदा नतास्ति ।**
**पुत्रद्वयस्य दुहितुश्च वशंवदस्य**
**यो भूषितः पितृतयाऽमितयापि दिष्ट्या ॥**[5]

अस्मिन् काश्मीरे प्रान्ते अनेके प्रशिक्षिताः कृषकाः सन्ति । तेस्वकौशलमुपयुज्य उत्कृष्टसेवनास्पातिप्रभृतीनि फलानि कुङ्कुमकेसरादि दुर्मूल्यवस्तु च बहुना श्रमेण उत्पादयन्ति । एते पदार्थाः यथा देशे तथा विदेशेऽपि बहुप्रशंसिताः भवन्ति । जनाः अपि आग्रहेण प्राथम्यं दत्त्वा च एतान् पदार्थान् क्रीणन्ति ।

**अत्रत्यसेवफल-नास्पतिकेशराणि**
**चोत्पादितानि कृषकैर्बहुना श्रमेण ।**
**देशान्तरेषु बहुमानपदं लभन्ते**
**श्रद्धास्पदं भवति को न गुणैकधारी ॥**[6]

शीतकाले काश्मीरे अत्यधिकहिमपातः भवति । सर्वत्रबहुपरिमाणेन हिमपातात् वृक्षादयः आच्छादिताः भवन्ति । कविः एतदुत्प्रेक्ष्य कथयति यत् निविडपादपैः शोभितस्य काश्मीररूपिणः नायकस्य कोमलशरीरोपरि प्रकृतिनायिका अनुरागिणी भूत्वा शुभ्रं हिमरूपकं सुन्दरं प्रावारकम् आच्छादयति किमु ? अर्थात् सर्वत्र हिमपूर्णत्वात् तद्रूपकेण प्रावारकेण काश्मीरनायकः प्रकृतिनायिकाद्वारा आच्छाद्यते इति उत्प्रेक्षा जायते । चतुः पार्श्वे पर्वतवेष्टितं भारतस्याविच्छेद्याङ्गरूपेण परिचितं प्राकृतिकसौन्दर्यपूर्ण काश्मीरम् आत्मसात् कर्तुम् तस्य सीमान्ते विद्यमानः देशः विफलं प्रयासं करोति । पूर्वमपि सः एतादृशीं विधाय पराजयवरणं कृतवान् । एतद् विस्मृत्य अधुनापि काश्मीरं निजाधीनं विधातुं सः देशः चेष्टते, परन्तु सफलो न भवति ।

**भूस्वर्ग इत्यभिधया विदितं समन्तात्**
**काश्मीरकं छलबलेन निजं विधातुम् ।**
**अत्यन्तगर्हितकरः प्रतिवेशिपाकि-**
**स्थानोऽधुनापि कु. उते विफलं प्रयालल् ॥**[7]

**संस्कृतिवर्णनम् -**

काश्मीरस्य परिसीमायां शोभामानः तापीसरित् जलैः पवित्रितः दुर्गरः इति एकः देशः अस्ति । अत्रत्यजनाः अतीव संस्कृतिप्रियाः । ते स्वसंस्कृतिसंरक्षणे बद्धादराः । तापीनदीजलामृतेन ते दैनन्दिनं कार्यं साधयन्ति । वेदं प्रति जनानां महानादरोऽपि वर्त्तते । स्वाध्यायमांसला अत्रत्याः जनाः सन्ति । अतः काश्मीरदेशस्य जनाः अतीवसंस्कृतिप्रियाः वर्त्तन्ते । अतः अत्र कविः कथयति -

**काश्मीरदेशपरिसीमसमीपवर्ती**
**तापीसरिज्जलसुधाकणकृत्यपूर्तिः ।**
**पूतः सुसंस्कृतजनः श्रुतिवित्तपूर्णः**
**स्वाध्यायतुन्दिलितदुर्गरदेश आस्ते ॥**[8]

**उपसंहारः**

प्रकृतिशोभापरिपूर्णोऽयं प्रान्तः सर्वदा मनोहारी वर्त्तते। संस्कृतसाहित्ये शारदाक्षेत्ररूपेण अस्य प्रदेशस्य ख्यातिः सुतरां चकास्ति । शैवदर्शनस्य उद्गमस्थलमयं प्रदेशः इति प्राचीनकालात् प्रवादः वर्तते । काश्मीरविषये नीलमुनिप्रोक्तं नीलमुनिपुराणं सर्वप्रथममस्ति । कह्लणस्य 'राजतरङ्गिणी' इति ऐतिहासिकं महाकाव्यं काश्मीरस्य नृपाणां विषये, अर्थनीतिविषये, भौगोलिकस्थितिविषये, सामाजिकस्थितिविषये च सम्यक् सुचनां प्रददाति । राज्ञां चरित्रं शासनप्रणाली चापि आलोचिता । काश्मीरे दर्शनीयस्थानविषये आलोकपातः कृतोऽस्ति । सरलसंस्कृतेन रचितं छन्दोमयम् ऐतिहासिकं खण्डकाव्यमिदं अत्र प्रकृतिवर्णनं तथा संस्कृतिवर्णनं सुमधुरम्अस्ति । सूर्यमणिरथःमहोदयः काश्मीरोदयखण्डकाव्ये काश्मीरस्य शोभावर्णनमुत्तमरूपेण कृतम्

[5] काश्मीरोदयम्-श्लोक- १५३
[6] काश्मीरोदयम्-श्लोक- १६५
[7] काश्मीरोदयम्-श्लोक- १६६
[8] काश्मीरोदयम्-श्लोक-१४२

### सन्दर्भग्रन्थसूची


1. रथः सूर्यमणिः। काश्मीरोदयखण्डकाव्यम्। प्रथमसंस्करणम्। पुरी: श्रीसदाशिवसंस्कृतपरिषद्; 2018।
2. रथः सूर्यमणिः। परोपकारी। प्रथमसंस्करणम्। पुरी: श्रीसदाशिवसंस्कृतपरिषद्; 2016।
3. रथः सूर्यमणिः। निबन्धशतकम्। प्रथमसंस्करणम्। पुरी: श्रीसदाशिवसंस्कृतपरिषद्; 2017।
4. शर्मा रामप्रकाशः। संस्कृतसुभाषितकोषः। वाराणसी: चौखम्बा संस्कृत सीरीज कार्यालय; 2015।
5. उपाध्यायः बलदेवः। संस्कृतसाहित्येतिहासः। वाराणसी: शारदा निकेतन; 2018।



**Creative Commons (CC) License**

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-Commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.


**About the Corresponding Author**



**सुरजविश्वालः** राष्ट्रियसंस्कृतविश्वविद्यालयस्य तिरूपति-परिसरस्य शोधच्छात्रः अस्ति। सः संस्कृतसाहित्ये, विशेषतः काव्यशास्त्रे, साहित्यालोचने, भारतीयसंस्कृत्याः अध्ययन-मनने च विशेषरुचिं वहति। तस्य अनुसन्धाने संस्कृतग्रन्थानां समीक्षात्मकम् अध्ययनम्, सांस्कृतिकमूल्यानां संरक्षणम्, तथा पारम्परिकज्ञानस्य संवर्धनं प्रमुखलक्ष्यं वर्तते।


© 2026 सुरजविश्वालः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/